শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে ত্রিপঞ্চাশং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে ত্রিপঞ্চাশং দশকম্ ॥

## ধেনুকাসুরৱধৱর্ণনম্

অতীত্য বাল্যং জগতাং পতে ৎৱ -
মুপেত্য পৌগণ্ডৱযো মনোজ্ঞম্।
উপেক্ষ্য ৱৎসাৱনমুৎসৱেন
প্রাৱর্তথা গোগণপালনাযাম্॥ **53.1** ॥

উপক্রমস্যানুগুণৈৱ সেযং
মরুৎপুরাধীশ তৱ প্রৱৃত্তিঃ।
গোত্রাপরিত্রাণকৃতেঽৱতীর্ণ -
স্তদেৱ দেৱাঽঽরভথাস্তদা যৎ॥ **53.2** ॥

কদাপি রামেণ সমং ৱনান্তে
ৱনশ্রিযং ৱীক্ষ্য চরন্ সুখেন।
শ্রীদামনাম্নঃ স্বসখস্য ৱাচা
মোদাদগা ধেনুককাননং ৎৱম্॥ **53.3** ॥

উত্তালতালীনিৱহে ৎৱদুক্ত্যা
বলেন ধৃতেঽথ বলেন দোর্ভ্যাম্।
মৃদুঃ খরশ্চাভ্যপতৎপুরস্তাৎ
ফলোৎকরো ধেনুকদানৱোঽপি॥ **53.4** ॥

সমুদ্যতো ধৈনুকপালনেঽহং
কথং ৱধং ধৈনুকমদ্য কুর্ৱে।

ইতীৱ মৎৱা ধ্রুৱমগ্রজেন
    সুরৌঘযোদ্ধারমজীঘনস্ত্বম্॥ **53.5** ॥

তদীযভৃত্যানপি জম্বুকৎৱে -
    নোপাগতানগ্রজসংযুতস্ত্বম্।
জম্বূফলানীৱ তদা নিরাস্থ -
    স্তালেষু খেলন্ ভগৱন্ নিরাস্থঃ॥ **53.6** ॥

ৱিনিঘ্নতি ৎৱয্যথ জম্বুকৌঘং
    সনামকৎৱাদ্বরুণস্তদানীম্।
ভযাকুলো জম্বুকনামধেযং
    শ্রুতিপ্রসিদ্ধং ৱ্যধিতেতি মন্যে॥ **53.7** ॥

তৱাৱতারস্য ফলং মুরারে
    সঞ্জাতমদ্যেতি সুরৈর্নুতস্ত্বম্।
সত্যং ফলং জাতমিহেতি হাসী
    বালৈঃ সমং তালফলান্যভুঙ্কথাঃ॥ **53.8** ॥

মধুদ্রৱস্রুন্তি বৃহন্তি তানি
    ফলানি মেদোভরভৃন্তি ভুকত্বা।
তৃপ্তেশ্চ দৃপ্তের্ভৱনং ফলৌঘং
    ৱহদ্ভিরাগাঃ খলু বালকৈস্ত্বম্॥ **53.9** ॥

হতো হতো ধেনুক ইত্যুপেত্য
    ফলান্যদদ্ভির্মধুরাণি লোকৈঃ।
জযেতি জীৱেতি নুতো ৱিভো ৎৱং
    মরুৎপুরাধীশ্বর পাহি রোগাৎ॥ **53.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে ত্রিপঞ্চাশং দশকং সমাপ্তম্॥